2024–25

# प्रतिदर्श प्रश्नपत्रम्

## संस्कृतम्

अवधिः– होरा त्रयम् पूर्णांकाः :– 80

### खण्ड – 'क' (अपठितांश– अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

धन्यः अयं भारतदेशः यत्र समये–समये स्वानामधन्याः बहवः महापुरुषाः समुत्पन्नाः। एते महापुरुषाः स्वकीयं समग्रं जीवनं राष्ट्र सेवायां समर्पयामासुः। एतेषु प्रातः वन्दनीयेषु गुरूकुल–कांगड़ी–विश्वविद्यालयस्य संस्थापकस्य स्वामिश्रद्धानन्दस्य स्थानं उत्कृष्टतमं वर्तते। यौवने विषय–वासना पंके निमग्नोऽपि मुंशीरामः तीव्रतपसा साधनया श्रद्धया च महात्मा मुंशीरामः बभूव तदनु स्वामिश्रद्धानन्द सरस्वती इति नाम्ना जगति विश्रुतः जातः। तस्य स्वामिनः जीवनं चन्द्रमसः कलेव तथा दीप्तिमत् वभूव, यथा सर्वो दिशः तस्य प्रकाशेन प्रकाशितः अभवत्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – 1/2x4=2

(i) कः देशः धन्यः अस्ति ?

(ii) स्वकीयं समग्रजीवनं राष्ट्र सेवायाम् के समर्पयामासुः ?

(iii) गुरूकुल कांगडी विश्वविद्यालयस्य संस्थापकस्य कि नाम अस्ति ?

(iv) स्वामिश्रद्धानन्दस्य स्थानं कीदृशं वर्तते ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1x2=2

(i) यौवने विषयवासनापंके निमग्नोऽपि कः महात्मा मुंशीरामः बभूव ?

(ii) महात्मा मुंशीरामः केन नाम्ना जगति विश्रुतः जातः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत ( निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1x3=3

(i) 'महात्मा मुंशीरामः' अत्र विशेषणपदं किम् ?

(ii) 'चन्द्रस्य' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(iii) 'आत्मनः' इत्यस्य समानार्थकं पदं गद्यांशात् चित्वा लिखत्।

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । – 1
(इस गद्यांश के लिए समुचित शीर्षक लिखिए) –

### खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. मंजूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा प्रार्थनापत्रम् उत्तरपुस्तिकायां लिखत। 1/2x8=4
(मंजूषा से उचित पद चुनकर रिक्त स्थानों की पूर्ति कर प्रार्थनापत्र उत्तरपुस्तिका में लिखिए)

| |
|---|
| **मंजूषा–** अनुगृहणन्तु, सेवायाम्, अनुमतिम्, निवेद्यते, कर्तुम्, सह, द्वादशकक्षायाःसर्वे छात्राः, विषयस्य |

(i)..........................
प्रधानाचार्यः
डी एन माध्यमिक विद्यालयः
रूडकी (हरिद्वारम्)।
महोदयः

सविनयं (ii)........................यत् वयं राजनीति विज्ञान ((iii) .................छात्राः स्मः । 'ऐतिहासिक स्थलानां भ्रमणाय' आगरानगरस्य यात्रां (iv).......................इच्छामः।

अस्माकं राजनीति विज्ञान विषयस्य शिक्षकः अपि अस्माभिः (v)............गमिष्यति। तस्य स्वीकृतिः अपि अस्ति। सम्प्रति भवताम् (vi).............. अपेक्ष्यते। कृपया अनुमतिं प्रदाय (vii).........................।

भवदाज्ञानुवर्तिनः
(viii)..........



Downloaded from www.cclchapter.com

3. मंजूषायां प्रदत्त शब्दसूची साहाय्येन अधोलिखितां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। 1/2 x 8= 4
(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्ण कर उत्तरपुस्तिका में पुनः लिखिये।)

एकस्मिन् वनप्रदेशे मानसोल्लास नाम (i).........................आसीत्। सः सत्यवचनः परम (ii).......................चासीत्। तस्य आश्रमे सर्वे पशवः ((iii) ................. वैरभावं विस्मृत्य मोदेन कीडन्ति स्म। व्याघ्रः वृषभेण सह (iv)...................... कीडति स्म। सर्पः नकुलेन सह (v)................स्म। एषा वार्ता स्वर्गस्थितस्य इन्द्रस्य कर्णपथम् आगता। तेन चिन्तितं यदि एतस्य कारुणिकस्य (vi)..............व्याद्नुयात् तर्हि मम् एतत् (vii).........................अपि समाप्तिं गच्छेत्। अयं ऋषिवरः मम पदं आक्रयेत्। अतः अचिरात् एवं प्रतिबन्धकोपायः (viii).............मया इति।

| **मंजूषा** – ऋषिः, पारस्परिकम्, कारूणिकः, प्रत्यहं, नृत्यति, भूमण्डलम्, चिन्तनीयः, इन्द्रपदम्। |
|---|

4. अधोलिखितेषु <u>एकं</u> विषयमधिकृत्य चत्वारि वाक्यमितम् एकम् अनुच्छेदं संस्कृतभाषायां लिखत– 1x 4= 4

(नीचे लिखे किसी <u>एक</u> विषय पर चार वाक्यों का संस्कृत भाषा में एक अनुच्छेद लिखिए)–

(i) विद्याधनं सर्वधनं प्रधानम्
(ii) परोपकारः
(iii) सत्संगतिः
(iv) कविकुलगुरूः कालिदासः

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरूत– 1x5=5
(निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए)

(i) <u>यान्यनवद्यानि</u> कर्माणि तानि सेवितव्यानि।
(ii) <u>जगच्चक्षुषि</u> भास्करे।
(iii) <u>गम्भीरस्वरेणैवम्</u> अवादीत्।
(iv) <u>भिक्षावटुनानुगम्यमानः</u> संन्यासी दृष्टः।
(v) <u>आचार्योऽन्तेवासिनमनुशास्ति।</u>

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां समास विग्रहाः कुरूत– 1x5=5
(निम्नलिखित वाक्यों में रेखांकित पदों का समास विग्रह कीजिए)

(i) सत्याय <u>मितभाषिणाम्।</u>
(ii) <u>प्रजातन्तुं</u> मा व्यवच्छेत्सीः।
(iii) मान्धाता च <u>महीपतिः</u> ।
(iv) यस्याः <u>शक्रसमो</u> भर्ता ।
(v) <u>पंचोपचारमिव</u> पूजनमस्ति मातुः।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति – प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1x6=6
(अधोलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ प्रत्यय जोड़कर रिक्त स्थान भरिए)

(i) स्वाधीनताऽऽर्यभुवि .................... समाना । (मूर्ति + मतुप् स्त्री0)
(ii) राजभवनं...............................(गम् + क्त्वा) वत्सराजो राजानं प्राह।
(iii) न दुर्जनः .........................उपैति। (सज्जन + तल् )
(iv) रामायणः एकः ( इतिहास + ठक् ) ..............................महाकाव्यः अस्ति।
(v) हस्तेनैव.......................... (वि + सृज् + क्त)
(vi) भार्याभर्तुः .........................भवति (सहाय + णिनि)


Downloaded from www.cclchapter.com

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1x4=4

(अधोलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिए)

(i) नैकेनापि समं.........................वसुमति। (गतः, गता, गतम् )

(ii) अल्पज्ञः एव..............................प्रलपति । (पुरुषः, पुरुषाः, पुरुषौ)

(iii) ..................................राजा मुंजः । (सन्तुष्टा, सन्तुष्टम्, सन्तुष्टो)

(iv) शाटीव सा................... काचन हल्दिघाटी । (जयति, जयती, जयतः )

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम्–

(अधोलिखित वाक्यों में विशेषण विशेष्य की अन्विति कीजिए)

(i) स्वप्रकृत्यनुकूलः....................... .अपि प्राप्यते। (वरः / वराः )

(ii) पुष्पंफलं तदनु..............................समीरः । (गन्धवहः / गन्धवहम्)

(iii) शोकसन्तप्तः..............................प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। (मुंजः / मुंजम्)

(iv) नोत्सहे...................................... काले वारयितुमत्र भवतीम्। (श्लाघनीयं / श्लाघनीये)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत शब्देषु उपपद विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत– 1x4=4

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थानों की पूर्ति कीजिए )

(i) मे पुत्रं मुंजः.........................विषादिनामारयिष्यति। (राज्यलोभम्)।

(ii) ............................मा प्रमदः। (स्वाध्याय)

(iii) दीर्घप्रयासेन कृतं हि वस्तु ........................भजेद विनाशम्। (निमेषमात्र )

(iv) ....................पक्षनिवहेनखमाहसन्तः। (नील )

## खण्ड – 'घ' (पठितांश अवबोधनम् भाग–I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

श्लोकम् अधीत्य शोकसन्तप्तो मुंजः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः–शनैः प्राह–तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुंजः प्रावोचद्–हे योगीन्द्र! महापापिनो मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) 1/2x2=1

(i) प्रायश्चित्तं कर्तुं मुंजः किं निश्चितवान् ?

(ii) राज्ञो वह्निप्रवेशकाले सभां को आगतः ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) 1

(i) मुंजः कापालिकं दण्डवत् प्रणम्य किमवोचद् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) 1x3=3

(i) 'गत' पदस्य विलोम पदमत्र किं प्रयुक्तम् ?

(ii) 'शोकसन्तप्तः मुंजः' अत्र विशेषणपदं किम् ?

(iii) 'कर्तुं' पदे कः प्रत्ययः ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)

कुण्डला – परस्परप्रीतिमतोः भवतोः उपदेशस्य नास्ति कोऽपि अवकाशः तदापि सखीस्नेहः मां भाषयति–भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः! परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः। पतिः यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत् खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति।

Downloaded from www.cclchapter.com

ऋतध्वजः– लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः।



मदालसा – कुण्डले! लक्ष्मीपूजायां न मे प्रवृतिः। यदि लक्ष्मी पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कारः।

ऋतध्वजः– स्वाभिमानिनि प्रिये! समक्षं ते कथं कापि सपत्नी स्थातुं शक्नोति ? लक्ष्मीस्तु तव दासी भविष्यति नैव सपत्नी। मद्गार्हस्थ्यं तु त्वदधीनं भविष्यति। आत्मानं भाविसन्ततिं च ज्ञानविज्ञानानुसन्धा़त्र्या हस्ते समर्पयितुमीहे। आगम्यताम् गुरुभ्यः पितृभ्यां च समाचारं श्रावयावः।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– 1/2x2=1

(i) परस्परमनुव्रतौ कौ त्रिवर्गं साधयतः ?

(ii) कस्याः अभावे कुपात्रेषु दीयमानं धनं क्षयमेति ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) पत्न्याः सहयोगः कस्याः रक्षार्थं अनिवार्यः अस्ति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) 'मद्गार्हस्थ्यं तु त्वदधीनं भविष्यति' अत्र क्रियापदं किम् ?

(ii)) 'स्वाभिमानिनि प्रिये' अत्र विशेष्य पदं किम् ?

(iii) 'भविष्यति' कस्य लकारस्य धातुरूपः अस्ति ?

12. अधोलिखितश्लोकौ पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे श्लोकों को पढ़कर प्रश्नों के उत्तर दीजिए)–

स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना,
राणाप्रताप–बलवीर्यविभासमाना।
आटीकते समुपमा नहि यां सुशोचिः,
शाटीव सा जयति काचन हल्दिघाटी।।

प्राची यदा हसति हे प्रिय! मन्दमन्दं,
वायुर्यदा वहति नन्दनजं मरन्दम्।
या प्रत्यहं किल तदा मतिमाननीयां,
शोभां दधात्युषसि कांचनकांचनीयाम् ।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– 1/2x2=1

(i) आर्यभुवि शाटीव का विराजते ?

(ii) उषसि हल्दीघाटी कीदृशीं शोभां दधाति ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) कदा हल्दीघाटी मतिमाननीयां शोभा दधाति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) 'समीरः' इति पदस्य पर्यायवाचिपदं श्लोकात् चित्वा लिखत।

(ii) 'उषसि' इत्यत्र का विभक्तिः ?

(iii) उपर्युक्त श्लोकात् द्वौ अव्ययपदौ चित्वा उत्तरपुस्तिकायां लिखत ?

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1/2+1/2 =1

(क) विवृत्तक्रियातन्त्रा मन्त्राः। मन्त्रणां स्तुतिनिन्दाव्याख्यानविनियोगग्रन्थो ब्राह्मणम्।

(i) उपर्युक्त पंक्तिः पाठ्यपुस्तकस्य कस्मात् पाठात् उद्धृताः ?

(ii) एषा पक्तिः मूलरूपेण कस्मात् ग्रन्थात् संगृहीतः?

(ख) प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।। 1/2+1/2=1

(i) एषा पंक्तिः केन प्रोक्तः?

(ii) एषा पंक्तिः कस्मात् ग्रन्थात् संकलितः ?

Downloaded from www.cclchapter.com

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत–
(नीचे दिये गये भावार्थो में से शुद्ध भावार्थ का चयन कर लिखिए)–

(क) अहो 'शोभनम्' गर्न्धवराज विश्वावसोः राजोद्यानम्। 1+1=2

(i) गन्धर्वराजविश्वावसोः उद्यानम् शोभते।

(ii) गन्धर्वराजविश्वावसोः राजोद्यानम् मनोहरम् अस्ति।

(iii) गन्धर्व देशस्य विश्वावसोः राजोद्यानम् अतीव शोभते।।

(ख) अपौरुषेय श्रुतिः।

(i) पुरुषस्य श्रोतं न भवति।

(ii) यः पुरुषः न भवति तस्य श्रोतं न भवति।

(iii) श्रुतिः अर्थात् वेदः व्रह्ममुखनिर्गतधर्मज्ञापकः अस्ति।

अथवा

अधोलिखितस्य श्लोकस्य प्रदत्तभावार्थं मंजूषायां प्रदत्तपदैः पूरयित्वा लिखत– 1/2x4=2
(निम्नलिखित श्लोक के दिये गये भावार्थ को मंजूषा में दिये गये पदों से पूर्ण करके लिखिए)

शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।
तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ।।

रामः कांचुकीयं कथयति यत्–माता (i) ..................प्राप्तः राज्यः यदि पुत्रार्थे (ii) .......................... तर्हि इदं मातुः लोभः (iii) ........................,वयं सर्वे भ्राताभरतस्य राज्यं (iv) ............................प्रयासं कुर्मः, कथं निर्दुष्टः स्मः।

| मंजूषा– पुरस्कारस्वरुपम्, वांछति, अस्ति, अपहर्तुम् |
|---|

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनःलिखत–
(निम्नलिखित दोनों श्लोकों के दिय गये अन्वयों में रिक्त स्थानों की पूर्ति कर पुनः लिखिए)

(क) स्वायत्तमेकान्तगुणं विधात्रा 1/2x4=2
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ।।

अन्वयः– विधात्रा (i).......................छादनम् स्वायत्तम् (ii)....................विनिर्मितम्। विशेषतः (iii) .................... समाजे अपण्डितानाम् विभूषणं (iv) ............................(अस्ति)।

(ख) मान्धाता च महीपतिः कृतयुगालंकारभूतो गतः 1/2x4=2
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये वापि युधिष्ठिरप्रभृतयो याता दिवं भूपते!
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ।।

अन्वयः– कृतयुग (i).......................मान्धाता महीपतिः गतः येन (ii)......................सेतुः विरचितः असौ दशास्यान्तकः क्व ? वा अन्ये युधिष्ठिर प्रभृतयः अपि (iii) ........................दिवं याता, एकेन अपि समं (iv)............................नैव गता भूपते! नूनं त्वया (सह) यास्यति।

16. अघोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत–1/2x4=2
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिए)

| **स्तम्भ 'अ'** | **स्तम्भ 'ब'** |
|---|---|
| (क) यस्याः शक्रसमो भर्ता | (i) भूवि शोच्यासने नृपे |
| (ख) अनेकसंशयोच्छेदि | (ii) स्वाध्यायस्तप आर्जवम् |
| (ग) दानं दमश्चयज्ञश्च | (iii) परोक्षार्थस्य दर्शकम् |
| (घ) क्रमप्राप्ते हृते राज्ये | (iv) नया पुत्रवती च या। |

Downloaded from www.cclchapter.com

17. अधोलिखितेषु वाक्येषु रेखांकितपदनां प्रसंगानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत– 1x3=3
(निम्नलिखित वाक्यों में रेखांकित पदो के प्रसंगानुसार उचित अर्थ कोष्ठक से चुनकर लिखिए)

(क) ततो मुहूर्ताभ्युदिते जगच्चक्षुषि भास्करे।(चन्द्रे,सूर्ये, मेघे)
(ख) सर्वस्य लोचनं शास्त्रं।(नेत्रम्,नासिका,वदनम्)
(ग) मुंजः वह्नौ प्रवेशं निश्चितवान्।(जले,पवने,पावके)

**खण्ड – 'घ'(संस्कृत साहित्य–परिचयः भाग–।।)**

18. (क) अधोलिखितानां प्रश्नानां उचितं विकल्पं चित्वा लिखत
(निम्नलिखित प्रश्नों के उचित विकल्प चुन कर लिखिए) 1x4=4

(i) अश्वघोषस्य जन्मः अभूत् –
(क) साकेते (ख) कश्मीरदेशे (ग) उज्जयिन्यां (घ) काश्यां
(ii) पण्डित अम्बिकादत्त व्यासः कुत्र अजयात् –
(क) काश्यां (ख) जयपुर नगर्यां (ग) उदयपुरे (घ) प्रयागे
(iii) बुद्व चरितम् महाकाव्यम् अस्ति –
(क) भासस्य (ख) अश्वघोषस्य (ग) व्यासस्य (घ) कालिदासस्य।
(iv) हितोपदेशः रचयिता अस्ति –
(क) नारायण पण्डितः (ख) विष्णुशर्मा (ग) कालिदासः (घ) विल्हणः

(ख) निम्नलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचितैः शब्दैः रिक्तस्थानपूर्तिः क्रियताम्– 1x4=4
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्तस्थानों की पूर्ति कीजिए)–

(i) दुष्यन्तः ........................नायकः अस्ति ।(धीरोदात्तः /धीरोद्धत्तः/धीरललितः )
(ii) हितोपदेशः .............................अस्ति।(नीतिग्रन्थः/नाट्यग्रन्थः/लक्षणग्रन्थः)
(iii) 'शिवराजविजयम्' ग्रन्थस्य विधा .......................अस्ति। (महाकाव्यः/उपन्यासः/ नाट्यग्रन्थः)
(iv) कांचुकीयः......................एकः पात्रः अस्ति। (काव्येषु /चम्पूकाव्येषु/नाट्येषु )



Downloaded from www.cclchapter.com

Downloaded from www.cclchapter.com

Downloaded from www.cclchapter.com

Downloaded from www.cclchapter.com